श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चत्वारिंशः सर्गः ॥

## श्रीरामेण वानरर्क्षरक्षसां स्वदेशे प्रस्थापनम्

तथा स्म तेषां वसतामृक्षवानररक्षसाम्।
राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत्॥ **7.40.1** ॥

गम्यतां सौम्य किष्किन्धां दुराधर्षां सुरासुरैः।
पालयस्व सहामात्यै राज्यं निहतकण्टकम्॥ **7.40.2** ॥

अङ्गदं च महाबाहो प्रीत्या परमया युतः।
पश्य त्वं हनुमन्तं च नलं च सुमहाबलम्॥ **7.40.3** ॥

सुषेणं श्वशुरं वीरं तारं च बलिनां वरम्।
कुमुदं चैव दुर्धर्षं नीलं चैव महाबलम्॥ **7.40.4** ॥

वीरं शतबलिं चैव मैन्दं द्विविदमेव च।
गजं गवाक्षं गवयं शरभं च महाबलम्॥ **7.40.5** ॥

ऋक्षराजं च दुर्धर्षं जाम्बवन्तं महाबलम्।
पश्य प्रीतिसमायुक्तो गन्धमादनमेव च॥ **7.40.6** ॥

ऋषभं च सुविक्रान्तं प्लवङ्गं च सुपाटलम्।
केसरिं शरभं शुम्भं शङ्खचूडं महाबलम्॥ **7.40.7** ॥

ये ये मे सुमहात्मानो मदर्थे त्यक्तजीविताः।
पश्य त्वं प्रीतिसंयुक्तो मा चैषां विप्रियं कृथाः ॥ **7.40.8** ॥

एवमुक्त्वा च सुग्रीवमाश्लिष्य च पुनः पुनः।
विभीषणमुवाचाथ रामो मधुरया गिरा ॥ **7.40.9** ॥

लङ्कां प्रशाधि धर्मेण धर्मज्ञस्त्वं मतो मम।
पुरस्य राक्षसानां च भ्रातुर्वैश्रवणस्य च ॥ **7.40.10** ॥

मा च बुद्धिमधर्मे त्वं कुर्या राजन् कथञ्चन।
बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम् ॥ **7.40.11** ॥

अहं च नित्यशो राजन् सुग्रीवसहितस्त्वया।
स्मर्तव्यः परया प्रीत्या गच्छ त्वं विगतज्वरः ॥ **7.40.12** ॥

रामस्य भाषितं श्रुत्वा ऋक्षवानरराक्षसाः।
साधुसाध्विति काकुत्स्थं प्रशशंसुः पुनः पुनः ॥ **7.40.13** ॥

तव बुद्धिर्महाबाहो वीर्यमद्भुतमेव च।
माधुर्यं परमं राम स्वयम्भोरिव नित्यदा ॥ **7.40.14** ॥

तेषामेवं ब्रुवाणानां वानराणां च रक्षसाम्।
हनूमान् प्रणतो भूत्वा राघवं वाक्यमब्रवीत् ॥ **7.40.15** ॥

स्नेहो मे परमो राजंस्त्वयि तिष्ठतु नित्यदा।
भक्तिश्च नियता वीर भावो नान्यत्र गच्छतु ॥ **7.40.16** ॥

यावद् रामकथा वीर चरिष्यति महीतले।
तावच्छरीरे वत्स्यन्तु प्राणा मम न संशयः ॥ **7.40.17** ॥

यच्चैतच्चरितं दिव्यं कथा ते रघुनन्दन।
तन्ममाप्सरसो राम श्रावयेयुर्नरर्षभ ॥ **7.40.18** ॥

तच्छ्रुत्वाहं ततो वीर तव चर्यामृतं प्रभो।
उत्कण्ठां तां हरिष्यामि मेघलेखामिवानिलः ॥ **7.40.19** ॥

एवं ब्रुवाणं रामस्तु हनूमन्तं वरासनात्।
उत्थाय सस्वजे स्नेहाद् वाक्यमेतदुवाच ह ॥ **7.40.20** ॥

एवमेतत् कपिश्रेष्ठ भविता नात्र संशयः।
चरिष्यति कथा यावदेषा लोके च मामिका ॥ **7.40.21** ॥

तावत् ते भविता कीर्तिः शरीरेऽप्यसवस्तथा।
लोका हि यावत्स्थास्यन्ति तावत् स्थास्यन्ति मे कथाः ॥ **7.40.22** ॥

एकैकस्योपकारस्य प्राणान् दास्यामि ते कपे।
शेषस्येहोपकाराणां भवाम ऋणिनो वयम् ॥ **7.40.23** ॥

मदङ्गे जीर्णतां यातु यत् त्वयोपकृतं कपे।
नरः प्रत्युपकाराणामापत्स्वायाति पात्रताम् ॥ **7.40.24** ॥

ततोऽस्य हारं चन्द्राभं मुच्य कण्ठात् स राघवः।
वैदूर्यतरलं कण्ठे बबन्ध च हनूमतः ॥ **7.40.25** ॥

तेनोरसि निबद्धेन हारेण महता कपिः।
रराज हेमशैलेन्द्रश्चन्द्रेणाक्रान्तमस्तकः ॥ **7.40.26** ॥

श्रुत्वा तु राघवस्यैतदुत्थायोत्थाय वानराः।
प्रणम्य शिरसा पादौ निर्जग्मुस्ते महाबलाः ॥ **7.40.27** ॥

सुग्रीवः स च रामेण निरन्तरमुरोगतः।
विभीषणश्च धर्मात्मा सर्वे ते बाष्पविक्लवाः ॥ **7.40.28** ॥

सर्वे च ते बाष्पकलाः साश्रुनेत्रा विचेतसः।
सम्मूढा इव दुःखेन त्यजन्तो राघवं तदा ॥ **7.40.29** ॥

कृतप्रसादास्तेनैवं राघवेण महात्मना।
जग्मुः स्वं स्वं गृहं सर्वे देही देहमिव त्यजन्॥ **7.40.30** ॥

ततस्तु ते राक्षसऋक्षवानराः
प्रणम्य रामं रघुवंशवर्धनम्।
वियोगजाश्रुप्रतिपूर्णलोचनाः
प्रतिप्रयातास्तु यथा निवासिनः॥ **7.40.31** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चत्वारिंशः सर्गः॥